International Journal of Sanskrit Research 2022; 8(1): 20-22

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 20-22
© 2021 IJSR
www.anantaajournal.com
Received: 14-11-2021
Accepted: 17-12-2021

**Swamee Samvardhaka Sharma**
Student, Department of Sanskrit, PRS University, Chhattisgarh, India

**Corresponding Author:**
**Swamee Samvardhaka Sharma**
Student, Department of Sanskrit, PRS University, Chhattisgarh, India

# भगवद्गीतादुर्गासप्तशत्योः प्रतिपाद्यसाम्यस्यानुशीलनम्

**Swamee Samvardhaka Sharma**

**प्रस्तावना**

सर्वोपनिषदां सारभूता भगवद्गीता महाभारतस्य भीष्मपर्वणोंऽशो वर्तते, दुर्गासप्तशती च मार्कण्डेयपुराणात् संगृहीतांशभूता। उभयोः ग्रन्थयोः प्रणेता श्रीकृष्णद्वैपायनो महर्षिव्यास एवास्ति। प्रतिपाद्यस्य महत्त्वात् उभौ ग्रन्थौ स्वतन्त्रकलेवरमवाप्य लोकप्रसिद्धिं गतौ। भगवद्गीतायाः मुख्यतया आध्यात्मिकं महत्त्वं मन्यते दुर्गासप्तशत्याश्च उपासनात्मकम्। जिज्ञासवो भगवद्गीतापरायणा भवन्ति, भक्तिपरायणाश्च दुर्गासप्तशत्यामुन्मुखीभवन्ति विशेषतश्च शारदीयनवरात्रिकाले। वस्तुतः दुर्गासप्तशत्यामपि भगवद्गीतासदृश एवाध्यात्मिकोपदेशो विन्यस्तो वर्तते। भगवद्गीतायाः दुर्गासप्तशत्याश्च प्रतिपाद्यस्य साम्यस्य अनुशीलनमेकैकशोऽभीष्यतेऽत्र।

भगवद्गीतायाः प्रतिपाद्यम् - धर्मक्षेत्रे पाण्डवधार्तराष्ट्रयोः सेना योद्धुं सज्जितासीत्।
तदा युद्धक्षेत्रमध्ये प्रविशन्नर्जुनो रथं संचालयन्तं श्रीकृष्णं वदति –

"अच्युत ! भवान् उभयोः सेनयोर्मध्ये रथं स्थापयतु, येनाहं प्रतिपक्षिणः पश्यामि।"

परञ्च संग्रामाय सम्मुखेऽवस्थितान् पितृजनान्, पितामहान्,आचार्यान्, मातुलान्, भ्रातृजनान्, पुत्रान्, पौत्रान्, श्वसुरान्, सुहृदः सर्वान् च बन्धुजनान् दृष्ट्वा तस्य मनो परं व्याकुलं भवति। विषीदन् स श्रीकृष्णं वदति -
"रणाय समुपस्थितं इमं स्वजनसमूहं दृष्ट्वा मम देहाङ्गानि शिथिलानि भवन्ति, मुखं शुष्कं भवति, शरीरं रोमाञ्चितं भवति। मम हस्तात् गाण्डीवं धनु: पतति, त्वग् दग्धं भवति, मन: भ्रान्तमिव भवति, अहं स्थातुं च न शक्नोमि। येषां कृते राज्यं भोगा: सुखानि च इष्टानि भवन्ति, ते सर्वे स्वजना अत्र युद्धाय तत्परा: सन्ति। अहं त्रिलोकस्य राज्यलाभाय अपि एतान् हन्तुं न इच्छामि। स्वजनं हत्वा वयं कथं सुखिन: स्याम:। हे माधव ! अहम् महत्पापं कर्तुम् तत्पर: आसम्। यदि संग्रामे शस्त्ररहितं प्रतिकारमकुर्वन्तं मां धार्तराष्ट्राः हनिष्यन्ति, तत् क्षेमतरं मन्ये।"-

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्।। 1

एवं उक्त्वा अर्जुन: शोकसंविग्नमानसो धनु: बाणं च परित्यज्य रथे सीदति। तत्पश्चात् श्रीकृष्ण: मोहग्रस्तमर्जुनम् वदति –

"अनवसरे त्वयि एष मोहः कथं कुतश्च जात:? एतत् क्लीबत्वं त्वयि नैव युज्यते। हृदयस्य दुर्बलतां परित्यज्य त्वम् युद्धाय उत्तिष्ठ।"–

कुतश्त्वा कश्मलमिदं विषमे समुपस्थितम्।[2]

तत्पश्चात् अर्जुन - वदति :"अहं संग्रामे भीष्मपितामहेन द्रोणाचार्येण सह कथं बाणैयुद्धं करिष्यामि :। अहं न जानामि यत् मम कृते किं कर्तव्यम् श्रेयष्करमस्ति। कातरताग्रस्त,: धर्मे मोहितचित्तच अह : कमपि निर्णयं कर्तुं न शक्नोमि। अतः मम कृते यत् श्रेय,स्यात् : तत् मह्यं वद। तव शिष्योऽहं शरणागतोऽस्मि।"-

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।। [3]

अर्जुनस्य एतस्य प्रश्नस्योत्तरे श्रीकृष्णेन विस्तृतोपदेशः क्रियते। उपदेशक्रमे श्रीकृष्णोऽर्जुनस्य विविधानां प्रश्नानामुत्तरं श्रावयति। अन्ते चार्जुनं पृच्छति श्रीकृष्णो निपुणाचार्यवत् यत् तस्य मोहो नाशं गतो न वा –

कच्चिदज्ञासम्मोहः प्रनष्टस्ते धनञ्जय।[4]

अर्जुनश्चाङ्गीकरोति यत् तस्य मोहो नष्टोऽभवत् –

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव।। [5]
एवंप्रकारेण मोहविनाशाय भगवद्गीतायाः सदुपदेशोऽभवत्।

**दुर्गासप्तशत्याः प्रतिपाद्यम् -** स्वारोचिषे मन्वन्तरे सुरथः नाम चैत्रवंशीयः राजा विद्यते। समस्ते क्षितिमण्डले तस्य शासनमस्ति। स प्रजाः पुत्रान् इव पालयति। परञ्च स राजा कोलाविध्वंसिभिः शत्रुभिः संग्रामे पराजितो भवति। राजधान्यां च दुष्टैरमात्यैः तस्य निर्बलस्य नृपस्य सेना अधिक्रियते कोशश्चापह्रियते। तदनन्तरं राजा सुरथः एकाकी अश्वमारुह्य गहनं काननं गच्छति। वनमेकमभिगम्य मुनेः मेधसः आश्रमे सत्कारमवाप्य स विचरणं कुर्वन् ममत्ववशात् चिन्तयति -

" पूर्वपुरुषैः पालितं मदीयं नगरमिदानीं मयैव रहितमस्ति। ये भृत्यजनाः धनभोजनादिकारणात् मम अनुसरणं कर्वन्ति स्म ते ,अद्य अन्येषां नृपाणामादेशं पालयन्ति। तथाविधैः अपव्ययिजनैः अचिन्त्यव्ययात्तु अतिप्रयत्नेन संचितः मम कोशः क्षीणः भविष्यति।"

एवम्प्रकारेण सदा विचारयन् सुरथः तत्र आश्रमसमीपे एकं वैश्यं पश्यति। तदा स तस्य परिचयं वनागमनस्य कारणं च पृच्छति। स च वैश्यः सुरथं कथयति-

"अहं धनिनां कुले उत्पन्नः समाधिर्नाम वैश्योऽस्मि। स्त्रीपुत्रा मे धनं हृत्वा गृहात् निष्कासितवन्तः। बन्धुहीनो चाहं तस्मादेव वनमागतोऽस्मिपरञ्च साम्प्रतं तेषां स्वजनानां , कुशलमकुशलं वा न जानामि।"

"यैः लोभिबन्धुभिः भवान् गृहात् निरस्तःतान् प्रति भवतः , एतादृशं स्नेहबन्धनं कथम् अस्ति?"

एवं सुरथेन पृष्टः वैश्यो वदति -

" सम्यक् वदति भवान्। परन्तु अहं जानन् अपि एतन्नाभिजानामि यद् यैः स्वजनैः सर्वमपहृत्य निराकृतः , तेषु प्रीतिरहितेषु मम मनः निष्ठुरं कथं नास्ति।"

तदा सुरथः वैश्येन सह मुनेः मेधसः समीपे गत्वा प्रश्नं करोति -

"भगवन् ! जानतोऽपि गतराज्यस्य अखिलेषु अङ्गेषु अज्ञानिजनसमानस्य मम ममत्वमस्ति। पुत्रदारादिभिः स्वजनैः संत्यक्तोऽपि एष वैश्यश्च तान् प्रति स्नेहबद्धोऽस्ति। एवं दोषं विज्ञाय अपि ममत्वाबद्धचित्तौ आवाम् उभौ अत्यन्तौ दुःखितौ स्वः। एतत् किमस्ति यत् ज्ञानवतोऽपि आवयोः बलवत्तरः मोहः ?"-

दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ।
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि।
ममास्य च भवत्येषा विवेकान्धस्य मूढता।[6]

सुरथस्य एतस्य प्रश्नोत्तरे ऋषिः सुमेधा वदति यत् विष्णोः महामाया भगवती ज्ञानिनामपि मोहं जनयति –

महामाया हरेश्चैषा तया संमोह्यते जगत्।
ज्ञानिनामपि चेतांसि देवी भगवता हि सा।।
बलादाकृष्य मोहाय महामाया प्रयच्छति। [7]

सैव महामाया मक्तिदात्री अपि – सारस्य बन्धनहेतुरपिसं,

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी।
संसारबन्धहेतुश्च सैव सर्वेश्वरी।।[8]

पुनश्च देवीचरितं वर्णयित्वा सुमेधा ऋषिः तौ नृपवैश्यौ महामायायाः शरणं गन्तुं परामृशति –

तामुपैहि महाराज शरणं परमेश्वरीम्।
आराधिता सैव नृणां भोगस्वर्गापवर्गदा।।[9]

तदा राजा सुरथः समाधिर्नाम वैश्यश्च महामायाया उपासनां कुरुतः। तयोः भक्त्या परितुष्टा महामाया प्रत्यक्षीभवति। राजा राज्याय वरं याचते वैश्यश्च ज्ञानाय। देव्याः वरप्रदानात् राजा भोगमवाप्नोति वैश्यश्च मोक्षं प्राप्नोति।
एवं प्रकारेण दुर्गासप्तशती मोहविषयकस्य प्रश्नस्य समाधानाय समारभ्यते।
निष्कर्षतो वक्तुं शक्यं यद् भगवद्गीताया दुर्गासप्तशत्याश्च उभयोः ग्रन्थयोः समारम्भः मोहग्रस्तं बोधयितुं भवति। भगवद्गीता मुक्तिविधानमात्रं प्रस्तौतिर्गासप्तशती दु, भोगमोक्षयोः उभयोरपि विधायिका। परञ्च उभयोः ग्रन्थयोः प्रतिपाद्यं मोहविनाश एवास्ति।

## सन्दर्भग्रन्थसूची


1. भगवद्गीता - 1.46
2. तदेव – 2.2
3. तदेव – 2.7
4. तदेव - 18.72
5. तदेव - 18.73
6. दुर्गासप्तशती – 1.45,46
7. तदेव - 1.55,56
8. तदेव - 1.58
9. तदेव - 13.4,5
10. गोयन्दका, जयदयाल: श्रीमद्भगवद्गीता; गोरखपुर: गीताप्रेस, सं 2072.
11. शर्मा, पंडितमग्निराम: दुर्गासप्तशती; मुम्बई: श्रीवेंकटेश्वर प्रेस, सं 2050.